Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# श्रीमाहेश्वरतन्त्रे आत्मतत्त्वरहस्यम्

U.S.V.N. Sailaja
Research Scholar
Department of Agama
National Sanskrit University –
Tirupati- 517507
Mob :: 7846830715
Email ID:: sailajaunnava@gmail.com

अमृताध्मातमेघाभममृताहरणं विभुम्।
पाञ्चरात्रप्रवक्तारं वन्दे वैकुण्ठभूपतिम्।।

परव्यूहादिपञ्चप्रकारेभ्यः विराजमानान भगवत् श्रीमन्नारायणेन भक्तसंरक्षणार्थं अर्चावतारोऽपि स्वीकृतः। एवमर्चारूपेण समाराधनार्थं भगवान् विष्णुः पद्मगर्भ, श्रीः, आदिशेषः, गरुडः, विष्वक्सेनेति पञ्चेभ्यः विशिष्टं पाञ्चरात्रमुपदिदेश। **शेषसंहितायां** -

**श्रीशेषपक्षीस्वरपद्मगर्भसेनेशम्भुख्यान् प्रतिबोधयंतम् ।**
**श्रीपाञ्चरात्रागमशास्त्र माद्यं विष्णुं सदाहं शरणं प्रपद्ये**[1] ।। इति

पाञ्चरात्रशास्त्रवैभवं प्रोक्तम्। तस्यैवैकायनम्, सात्वतम्, मूलवेद इत्यादीनि नामान्तराणि सन्ति। पाञ्चरात्रमिदमागमपरम्परायां वैष्णवागमे अन्तर्भवति। **श्रीप्रश्न-संहितायाम्** –**रात्रिरज्ञानमित्युक्तं पञ्चेत्यज्ञाननाशकम् ।**
**तच्छास्त्रं पञ्चरात्रं स्यादन्वर्थस्यानुरोधतः** ।।[2] इति,

रात्रिः अज्ञानसङ्केतः, पञ्च इति संख्यावाचकः, अज्ञाननाशकत्वाच्च पाञ्चरात्रमिति प्रोक्तम् । **पाद्मसंहितायां ज्ञानपादे** -

**पञ्चेतराणि शास्त्राणि रात्रीयन्ते महान्त्यपि ।**
**तत्सन्निधौ समाख्यातो तेन लोके प्रवर्तते ।।**
**चन्द्रतारागणं यद्वत् शोभते नैव वासरे ।**
**तथेतराणि शोभन्ते पञ्च नैवास्य सन्निधौ ।।**
**पञ्चत्वमथवा यद्यद्दीप्यमाने दिवाकरे।**
**ऋच्छन्ति रात्रयस्तद्वदितराणि तदन्तिके** [3] ।। इति

नाम दिवि यथा सहस्रमयूखैर्युतभानोः सन्निधौ चन्द्रतारागणाः कान्तिहीनानि

---

[1] शे.सं . 1.4
[2] श्री.प्र .2-40
[3] पा.ज्ञ -1-72,73,74

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

भवेयुः तद्वदितराणि शास्त्राणि पाञ्चरात्रपक्षे रात्रीयन्त इति एवं प्रथमाध्याये त्रिभिः श्लोकैः पाञ्चरात्रवैभवं प्रतिपादितम्। पाञ्चरात्रागमः आगम,मन्त्र,तन्त्र,तन्त्रान्तर इति सिद्धान्त चतुष्टयेन विराजते। ईश्वरसंहितायाम् -

**चतुर्धा भेदभिन्नोऽयं पाञ्चरात्रस्यागमः ।**
**पूर्वमागम सिद्धान्तं द्वितीयं मन्त्रसंङिकम् ।**
**तृतीयं तन्त्र सिद्धान्तं अन्यत्तन्त्रातरं भवेत्** [4]।। इति

प्रमाणपत्रम् सूच्यते। पाञ्चरात्रं सर्वमपि ज्ञानयोग क्रियाचर्या इति पादचतुष्टयेन विद्यते। प्रायशः अस्मिन् सिद्धान्ते240 अधिकाः संहिता ग्रन्थाः विद्यन्ते। संप्रतिकाले प्रायशः सप्त्यधिक ग्रन्था एव उपलभ्यन्ते ।

पाञ्चरात्रे ग्रन्थानां संहिता तन्त्रं इत्यपि व्यवहारो विद्यते। श्रीमद्भागवते सात्वत - धर्म इति, भागवततन्त्रमिति व्यवहारः दृश्यते। **डा.आर्.जि.भण्डार्करमहोदयः** Vaishnavisam Saivisam and mind Religion इत्यस्मिन् ग्रन्थे क्रिस्तोः तृतीयशताब्दात्प्रागेव तन्त्रशब्दः धारणाविशेषज्ञानं रहस्यमित्यस्मिन्नर्थे आगमसाहित्ये प्रस्तावितितः। । **शैवसम्प्रदाये कामिकागमे -**

**तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान् ।**
**त्राणाच्च कुरुते यस्मात् तन्त्रमित्यभिधीयते**[5] ।। इति

तन्त्रशब्दः रक्षणार्थे निरूपितः। वाराहितन्त्रे सृष्टिः, प्रलयः, देवतार्चनम्, साधन --सिद्धिः, पुरश्चरणम्, ध्यानं, योगः, षड्कर्मसाधनत्वमित्याष्टौ प्रकारेण तन्त्रशब्दः निरूपितः। यथा – **सृष्टिश्च प्रलयश्चैव देवतानां यथार्चनम् ।**

**साधनं चैव सर्वेषां पुरश्चरणमेव च ।।**
**षड्कर्मसाधनं चैव सर्वेषां ध्यानयोगाश्चुर्विधाः ।**
**सप्तभिर्लक्षणैर्युक्तमागमं तद् विदुर्बुधाः** [6] ।।

पाञ्चरात्रग्रन्थेषु श्रीमाहेश्वरतन्त्रमिति ग्रन्थः नारदपाञ्चरात्रे अन्तर्भवति। नारदपाञ्चरात्रे ज्ञानयोगचर्यापादान्तर्गताः विषयाः विवृताः। श्रीमाहेश्वरतन्त्रग्रन्थः ज्ञानपादे अन्तर्भवति।

अयं ग्रन्थः महेश्वरेण स्वपत्न्यै उमायै भगवतः श्रीकृष्णस्य वैभवप्रतिपादनपरत्वेन उपन्यस्तः। अस्मिन् तन्त्रे 51 पटलाः 3060 श्लोकाः विद्यन्ते। अस्मिन् तन्त्रे ब्रह्मज्ञान - जिज्ञासूनां तत्वज्ञानप्रबोधकसाधनीभूतविषयाः विवृताः। पाञ्चरात्रे विष्णुप्रोक्तानि अन्यानि पञ्चविंशतितन्त्राणि विद्योतन्ते। तेषु श्रीमाहेश्वरतन्त्रम् अन्यतमम्।

---
[4] ई.स - 21-560
[5] कार. आ
[6] वा.त. 3.28-29

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

तन्त्रशब्दः वैदिकागमेषु विशेषार्थे प्रयुक्तः। प्रायशः वैष्णवशैवशाक्तागमेषु तन्त्र - शब्दार्थः ज्ञानार्थ कत्वेन निरूपितः। तथापि विश्वसारकामिकादिशैवागमेषु ज्ञानविस्तारः अर्थात् सृष्ट्यादिभौतिकरहस्यानां विवरणपूर्वकत्वात्तन्त्रशब्दः रक्षार्थे प्रयुक्तः। आध्यात्मिक-मन्त्राणं समनुष्ठानेन भौतिकापदानां निवारकाः तान्त्रिकग्रन्थाः इति ज्ञायते । **विश्वसारतन्त्रे** -

आज्ञा वस्तु समन्ताच्च गम्यत इत्यागमो मतः ।
तनुते त्रायते नित्यं तन्त्रमित्थं विदुर्बुधाः[7] ।। इत्युक्तम् ।

एवमेव सुप्रसिद्ध **कामिकागम ग्रन्थे** –

तनोति विपुलार्थान् तत्वमन्त्रसमन्वितान् ।
त्राणञ्च कुरुते यस्मात् तन्त्रित्याभिधीयते [8] ।। इति ।

वाराहितन्त्रे – सृष्टिश्च प्रलयश्चैव देवतानां यथार्चनम् ।
साधनं चैव सर्वेषां पुरश्चरणमेव च ।।
षट्कर्मसाधनं चैव सर्वेषां ध्यानयोगश्चतुर्विधाः।
सप्तभिर्लक्षणैर्युक्तमागमं तद् विदुर्बुधाः[9] ।

सृष्टिः, प्रलयः,देवतार्चनं, साधनसिद्धिः, पुरश्चरणम् , मारण, मोहन, उच्चाटन, कीलन, विद्वेषण, वशीकरणानि षट्कर्माणि, ध्यानयोगादिलक्षणैर्युताः आगमशब्दाभिधेयः सात्वतधर्मः प्रसिद्धे पाञ्चरात्रे विशेषरूपेण 108 संहिताः सन्ति। शाण्डिल्यादिमहर्षिभ्यः भगवता विष्णुना उपदिष्टेषु पाञ्चरात्रदर्शनग्रन्थेषु बहवः ग्रन्थः सृष्ट्यादिसर्वविधतत्वानां स्वरूपनिरूपणादि कृतम्। मननशीलानां मुमुक्षूनां मोक्षप्राप्तये भगवदुपासना, तदार्चनं वा विशेषमिति आचारणमिति ज्ञायते। जितेन्द्रियेण वासुदेवादिचातुर्व्यूहानां संपूजनेन भगवन्तं प्राप्नोतीति आगमग्रन्थाः निरूपयन्ति ।

नारदपाञ्चरात्रान्तर्गते माहेश्वरतन्त्रे पाञ्चरात्रेपासकानां कृते चातुर्व्यूहसमाराधनं प्रपञ्चितम्। माहेश्वरतन्त्रे आत्मसाक्षात्काररूपेण भगवतः ज्ञानमुपेत्य मोहरूपाज्ञाननाशः भवेदिति निरूपितम्। आत्मसाक्षात्कारविषयेपरमेश्वर पार्वतीनां प्रति तत्वज्ञानोपदेशं कृतवान् ।विशिष्य पञ्चमेऽध्याये तत्वज्ञानस्य रहस्यतय समुपासनेन ब्रह्मज्ञान संभवः भवेत्। प्रायशः 60 श्लोकेषु अज्ञाननाशद्वारा ब्रह्मानुग्रहप्राप्तये आवश्यकाः विधयः निरूपिताः। महाविष्णुना लक्ष्म्यै प्रतिपादिताद्यनाशकानां कर्माणं विषये स्वपतिं महेश्वरं पार्वती पप्रच्छ। सन्दर्भेस्मिन् पतिं महेश्वरं सम्यक् स्तौति। संतुष्टः महेश्वरः पार्वत्यै सृष्टिहेतुभूतस्यात्मतत्वस्य रहस्योपदेशं कृतवान्। सूर्यस्य प्रकाशनेन अन्धकारः नस्यते। सनातनपरब्रह्मज्ञानेन अज्ञाननाशः भवति। आत्मज्ञानं तु सर्वेषां प्रत्यक्षं मोक्षदायकम्। तर्कादीनां निरूपितस्य ब्रह्मणः तत्वस्य बोधकत्वं तन्त्रादिना साध्यते। पत्रपुष्पफलादियुतवृक्षः बीजात्समजायते। एवमज्ञानप्रभावमोहादयः जगत् कारणस्य

[7]विश्व.त – 3.12
[8]का.आ – 11.3
[9]वा.ता – 8.4,5

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

ब्रह्मणः समाराधन परमेव विनिष्टं भवति । माहेश्वरतन्त्रे -

यत्त्वयोक्तं पुरा मोहो जगत्कारणरूपकः ।
यथ बीजादुद्भवन्ति पत्रपुष्पफलादयः ।।
एवं मोहात्समुद्भूतं सदेवासुरमानुषम् ।
अज्ञानप्रभवो मोहो मोहाज्जातं चराचरम्[10] ।। इत्युक्तम् ।

साधकस्य स्वात्मज्ञानेन अज्ञानप्रभवः मोहहः तदाधारितं जगदपि मोहरूपमिति मिथ्यावादः परिह्रीयते। अज्ञानेनोत्पन्नः मोहः भ्रान्तिजनकगुणैः जगदपि मोहात्मि-काथितिभावना यदि भवेत्सा त्यज्या इत्युक्तम्। अक्षरपरब्रह्मणः ज्ञानेन मोहकारकं ज्ञानं विनस्यति। निर्दोषस्य निर्मलभूतस्य स्वयंप्रकाशरूपात्मज्ञानेन साधकस्य सदस -द्भावतारतम्यं समवगम्यते। तदुक्तं माहेश्वरतन्त्रे -

अक्षरं यत्त्वया प्रोक्तं निष्प्रपञ्चं निरामयम् ।
निर्देषं निर्मलं शुद्धं निरीहं सङ्गवर्जितम् ।।
स्वप्रकाशं गुणातीतं ज्ञानरूपं समं शिवम् ।
निर्विकारं सदाभान्तं सदसद्भावतः परम्[11] ।। इति। इत्यादिना

पार्वत्यै पूर्वमेव परमशिवः उपदिष्टवान्। अज्ञानजनकमोहनाशाय कैवल्यप्राप्तये च सदसद्भावज्ञानं कथं घटत इति पार्वतीदेव्याःप्रश्नस्य महेश्वरेण समाधानेवं दत्तम्।रहस्य रूपमिदं विशेषविषयं पार्वत्यै उपदेष्टुमर्हति। अन्धकारात्मकस्य जगतः यावत् सूर्योदय -भावित्वं न प्रकाशते तथैव तर्करूपबुद्ध्या शास्वतपब्रह्मज्ञानं नैव उदेति। केचन मूढ -बुद्धयः तर्के कुतर्कं सम्भाव्य कैवल्यज्ञानं विस्मरन्ति। सप्रमाणविदो जनाः पण्डिताः अक्षरब्रह्मणः समुपासनमज्ञाननाशकमिति, विशिष्य प्रत्यक्षरूपविग्रहाराधनमेव तत्व-ज्ञनोत्पत्तिरिति मन्वते। श्रुतिषु कैवल्यविषये ये ज्ञानांशाः प्रोक्ताः ते विषयाः विदुषैः समाश्रियन्ते। अक्षरपरब्रह्मणः तत्वज्ञानावबोधनेन अज्ञानरूपमोहः नश्यति। केवल-व्यावहारिकज्ञानादनृतभावः कैवल्यविषये भवति, न तथा सत्यज्ञानविषये शाश्वत-कैवल्यज्ञानस्थितिरिति परमेश्वरेण प्रोवाच । तदुक्तम् -

न जानाति तथा देवि ! प्रमाणान्यपि कृत्स्नशः ।
परे ब्रह्मण्यक्षरेऽस्मिन् अज्ञाननावेशमाहृतम् ।।
तस्माद्युक्तिं न कर्त्तव्या श्रुतिभिर्या विरुध्यते ।
अनुकूला श्रतिगिरां युक्तिः सा विदुषां मता ।।
यथा न सत्यादनृतात्केवलाद् व्यावहारिकाम् ।
तथा सत्यानृताभ्यां तु व्यवहारः प्रवर्त्तितः[12] ।।

---
[10]मा.त - 5.8,9
[11]मा.त - 5.12,13
[12]मा . त - 5.23 - 25

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

लौकिकालौकिकविषये आद्यं प्रत्यक्षभूमपरं परोक्षरूपं ज्ञनमित्थं ज्ञायते। लोकोक्तयः अप्रमाणानि यदि भवेयुः कथमलौकिकोक्तयः स प्रमाणानीति न शङ्कनीयम्। यथा श्रुतिषु पूर्वोक्तैः महर्षिभिः तत्सम्भवात्। ब्राह्मणादिचतुर्षु वर्णेषु वेदानुवर्तिनः ब्राह्मणा एव वैदिकमन्त्राणामनुष्ठानेन प्रत्यक्षज्ञानपराश्चेत् कथमन्येषामिति शङ्कायां भगवतः नामानुसन्धानं फलप्रदमिति परमेश्वरोऽसूचयत्। प्रमाणराजस्य प्रत्यक्षस्य प्रकाशकाः आराधनाविधाय आध्यात्मिकानुभूति प्रकारकाः कथ्यन्ते। शब्दप्रमाणभूताः मन्त्राः शब्दब्रह्माभिधेयाः जीवस्य देहप्रवेशेन अज्ञानादिदोषाः भवेयु अज्ञानमिदं सत्वमात्मनि सञजातम्। भगवतः व्रतोपवासतपोनियमादिभिः चेतनसंबन्धविमुक्तिर्भवति। तथैव स्वाध्यायाध्यनादयः तीर्थस्नानादीनि ब्रह्मचर्यादिचतुराश्रमेषु तत्कर्मानुष्टादिभिः बन्ध - मुर्क्ति -र्भूत्वा चेतनः भगवनुग्रह प्राप्नोति सोऽयं परमान्नदजनकः पुरुषोत्तमः ईश्वरः यानीक्षते सोऽनुग्रहवशादस्मिन्नज्ञानौपाधिरूपसंसारं विहाय परमे ब्रह्मणि लयो भवेत्। अतः प्रिये ईदृशजीवनोपधये ब्रह्मज्ञानवशात् स्वचारणीयानि कर्माणि दैवभावेनाचरय्य तस्य समाराधनं उपचारपूर्वकर्मानुष्ठीय संसारिणः सर्वेपरंसिद्धिं प्राप्नुयेरन्निति मे मतिः इत्युवाच ।

पत्युः परमेश्वरस्य समाधानश्रवणेन सन्तुष्टा परमेश्वरी पार्वती- **मन्मासाग्रणी दीनबन्धो महानन्दपूर्वकसूक्तिंमापीय सन्तुष्टान्तरङ्गहृदयसञ्जाता** इत्युक्तवती। तदनु परमेश्वरं ज्ञानज्ञानभेदविभागविषये सृष्टिसंहारयोः विषये च जिज्ञासां प्रकटी चकारा। **यथा** - **अज्ञानं यन्मया प्रोक्तं न सन्नासत्तदुच्यते ।**
**सच्चेन्मुक्तिसमुच्छेदो ह्यसच्चेद्भासते कथम् ।।**
**अनिर्वाच्यमिदं तस्मात् त्रिगुणोत्पादकं तथा ।**
**ज्ञाननाशय भावरूपं मूलाज्ञानं विदुः प्रिये ।।**
**शशश्रृङ्गनरश्रृङ्गवन्ध्यापुत्रखपुष्पवत् ।**
**अज्ञानं कथितं सद्भिः कथं सदिति चोच्यते ।। इति।**

स्वस्वरूपावबोधं ज्ञानमित्युच्यते। स्वस्वरूपभ्रमविषयः विकल्पेन भवसंज्ञकः संसारः अभिधीयते।संसारान्मोक्ष एव सद्भाविति ब्रह्मप्राप्तिहेतुभूतमिति च सूच्यते। परब्रह्मणः अभावः न भवति। यतो हि सच्छब्दवाच्यं त्रिगुणात्मकं जगत् पृथिव्यादि पञ्चभूतैः श्रुतिषु प्रसिद्धत्वादित्युक्तम्। सच्छब्दवाच्यस्य परब्रह्मणः प्रकृतिस्वरूपत्वं , प्रकृतेरा-त्मत्वं, श्रुतिषु निरूपितम् । **यथा** -

**यः पृथिव्यां तिष्ठन् ।**
**यो वायौ तिष्ठन् ।**
**य आकाशे तिष्ठन् ।**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यः देवः एको नारायणः[13] इत्यादयः।

भ्रान्तात्मनः जन्मादिशरीरगतविकल्पादयः प्राप्यासद्भावकल्पा इव नश्यन्ते। ब्रह्मज्ञानं कार्यकारणभेदेन द्विधा विभक्तम्। कारणरूपे अक्षरे परमानन्दे ब्रह्मज्ञानं भवे –देव, कार्यात्मरूपं बुद्धेः आभासभेदेन दीपो भवति। यथा कार्यात्मकं पिण्डं तथा कारणात्मकं ब्रह्मभावमिति विपश्चितः मन्यन्ते। उपाधिवशात्सूर्यद्वयाभासे निरूपादि कत्वेनैकत्वप्रतीतिः सूच्यते। एवमक्षररूपब्रह्मणः उपाधिवशात् त्रिगुणात्मकं जगदपि ब्रह्मत्वेनावभासते। उपाधिविषयेऽपि मूलोपाधितया सच्छब्दवाच्यब्रह्मणः क्षुद्रोपाधि -रूपेण तमः प्रधानभूतः मलिनात्मकः संसारः सूच्यते। कार्योपाधेः निकृष्ठत्वात्तमसः नाशेन सर्वगुणविशिष्टस्य जीवस्य सृष्टिः वितनुते। जीवस्य मोहनाशेन अद्वितीयत्व -प्रतीतेः नारायणस्य भगवत्स्वरूपत्वं श्रुतिषु प्रपञ्चितम्। शरीरसन्निविष्टस्य जीवस्य जाग्रत्स्वप्नसुषुप्तिकाः त्रिविधबुद्धिवृत्तयासकृत्समावर्तन्ते। ब्रह्मज्ञानप्राप्तिहेतोः सुषुप्तौ लयस्थानं प्रकीर्तिते।भगवतः नारायणस्योपाधिकत्वं सुषुप्तिज्ञानमित्युच्यते। आदिजीव -महाजीवभेदेन विष्णुरेव परब्रह्मरूपवान् भवति। स्वप्नजागरणयोः समानत्वात् शयना -वस्था आभासरूपा एव। सुषुप्त्यवस्थां तु मूलभूतब्रह्मणः मूलज्ञानत्वेन परमात्मनुभवः सिद्धयति। सः परमात्मा अक्षरपरब्रह्माभिधीयते। ततःपरं अज्ञानविषये भेदः उच्यते। विक्षेपावरण भेदेन द्विधा विद्यते। आवरणात्मकशक्तिद्वारा अज्ञानमावृत्य मेघावरण च्छायया सूर्यः पिहितः तथैव ब्रह्मज्ञानं न स्यात्।विक्षेपशक्तया आत्मज्ञानहेतोः प्रकृतेः बाह्याभ्यन्तरज्ञानं समवगच्छति।सत्वरजस्तमोगुणादिहेतुना जीवस्यासद्भावेन चाहंकारः सञ्जायते। अयमहङ्कारः सत्त्वरजस्तमोभेदेन त्रिविधः । **यथा** -

**नारायणेन रूपेण स्वयं पश्यति चाक्षरः ।**
**स वेदात्मोऽपि देवोऽपि बहुस्यामित्यमन्यत ।**
**अहङ्कारस्ततो जातो विकुर्वन् समभूत्त्रिधा ।।**
**सात्विको राजसश्चैव तामसश्चेति वै त्रिधा ।**
**तामसादप्यहङ्कारज्जडमासीन्नभः प्रिये[14] ।। इति ।**

आकाशस्य शब्दगुणकत्वतेन श्रोत्रेन्द्रियः जातः, तेनाकाशशब्दविषयहेतोः सात्विक -देवता विष्णुः संसूचितः। रजोगुणप्रधानेन वगीन्द्रयस्योत्पत्तिः सात्विकाग्निवदीन्द्रयाधि -ष्ठानदेवता भवति।

एवं रूपेण सत्वरजस्तमोगुणः प्रकृतौ विद्यन्ते । एतेषां गुणानां अधिष्ठाता भगवान् विष्णुः इति विशेष रूपेण परमेश्वरः उपदिष्टवान् ।

---

13. छा.उ 6.3 .5-8

14मा.त - 6.41,42

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed International Journal( Fulfilled Suggests Parametres by UGC)
Volume:14, Issue:3(1), March: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

## उपयुक्तग्रन्थसूची

1.कामिकागमः--सं.स्वामिनाथशिवावार्यः–दक्षिणभारतार्चकसंघप्रचुरणम्- चेन्नपुरि -1975.

2.श्रीमाहेश्वरतन्त्रम्- डा.सुधाकरमालवीयः– चौकम्बा कृष्णदास अकादमी- वारणासी - 1997.

3.छान्दोग्योपनिषत् - मोतीलाल बनारसीदास- वारणासी - 1970.

4. ईश्वरसंहिता- पि.बि. अनन्ताचार्यस्वामि – शास्त्रमुक्तावलीशीरीस – काञ्चीपुरम्- 1921

5. श्रीप्रश्नसंहिता – सीता पद्मनाभनम् – रा.सं.विद्यापीठम्- तिरुपतिः – 2006

6. शेषसंहिता – एल् श्रीनिवासाचार्यः- मैसूरु – 1935

7. पाद्मसंहिता – एस् पार्थसारथि अय्यङ्गार – मैसूरु- 1891